*** रेखाङ्कितं पदमाधृत्य संस्कृतप्रश्ननिर्माणं कुरुत ।**

१) संज्ञाने <u>विवशी</u>करोति । २) गृहे गृहे <u>तरवो</u> रोप्यन्ताम् ।

### ब) शब्दज्ञानम् –

*** पर्यायशब्दाः –** अधनः, मुदा, शिला, रसालः, सकृत्

*** विलोमशब्दाः –** दिवम्, धृत्वा

### क) पृथक्करणम् –

*** घटनाक्रमसंयोजनम्–** १) i) रसालतरुरोपणम् । ii) अस्माकं निर्वृतिगमनम् ।
iii) शिलाभक्षणम् । iv) मन्त्रिणाम् आदेशपालनम् ।

*** जालरेखाचित्रम्–**

अधुना कुत्र वर्तते ?

आम्रफलं ---------- | काजूगरं --------- | कदलीफलं ---------- | शर्करा ---------

## सप्तमः पाठः।

# विन्ध्याद्रिवर्णनम् ।

*** संस्कृतेन उत्तरत।**

१) विन्ध्याद्रौ कस्य मूर्तिः विभाति ?
२) रेवा सेवाव्रतं कथमाचरति ?
३) पुलिन्दः गृहमागतानामतिथेयं कथं कुरुते ?
४) के कुलनायकस्य जयघोषं कुर्वन्ति ?
५) भिल्लीषु कः मोदं तनुते ?

*** रेखाङ्कितं पदमाधृत्य संस्कृतप्रश्ननिर्माणं कुरुत ।**

१) विन्ध्याभिधो शैलराजः राजति ।
२) समीरः भिल्लीषु मोदं तनुते ।
३) पत्रैः परिकल्पितेषु पात्रेषु पुलिन्दः आतिथेयं कुरुते ।
४) उपलाः माहेश्वरबाणरूपं विन्दति ।
५) कुरङ्गाः परितः दृष्टिं निक्षिप्य चर्वन्ति ।
६) मतङ्गजाः राजलक्ष्म्याः निरामयं लक्षणम् ।
७) प्रपाताः जयघोषं उच्चैः कुर्वन्ति ।

**ब) शब्दज्ञानम् –**

*** पर्यायशब्दाः –**

देवता, त्रिदशाः, शैलः, शिवः, समीरः, मोदः, सौरभः, पत्रम्, रेवा, नर्मदा, सानु, उपला, शुकः, कीशः

**क) पृथक्करणम् –**

१)




२)




३)




*** घटनाक्रमसंयोजनम् –**

बाणरूपं विन्दन्तः ।
आवर्तमध्ये भ्रमन्तः ।
उपलाः पतन्तः ।
उपला सानुमध्यगताः ।

## पद्यं-स्थूलवाचनम्।

## गङ्गास्तोत्रम् ।

*** संस्कृतभाषया एकवाक्येन उत्तरं लिखत ।**

१) गङ्गायाः जलमहिमा कुत्र ख्यातः ?
२) गङ्गा कस्य ऋषेः कन्या ?
३) गङ्गा कस्य जननी ?
४) गङ्गातटनिवासः कस्य समः वर्तते ?
५) शंकराचार्यस्य मतानुसारेण कः नरः जयति ?
६) गङ्गास्तोत्रं कस्मिन् वृत्ते रचितम् ?
७) गङ्गा कुत्र विहरति ?
८) गङ्गा किं दूरीकरोति ?
९) कः परमपदं गृह्णाति ?
१०) गङ्गास्रोतसि स्नात्वा किं भवति ?
११) गङ्गा किं किं हरति ?
१२) गङ्गायाः कानि विशेषाणि निर्दिष्टानि ?
१३) गङ्गायाः जलपानेन किं भवति ?
१४) गङ्गायाः अपरं नाम किं ?

=====**=====**=====

## परिशिष्टम् ।

*** उचितं विकल्पं चित्वा वाक्यं पुनर्लिखत ।**

१) .................... आदिकाव्यम् ।
अ) महाभारतम् ब) रामायणम् क) भागवतम्

२) विदग्धकाव्यपरम्परा .............. इति कवेः काव्यतः प्रारब्धा ।
अ) वाल्मीकिः ब) अश्वघोषः क) कालिदासः

३) ............... इति कवेः शैली नारिकलफलसंमितम् इति उक्ता ।
अ) माघः ब) श्रीहर्षः क) भारविः

४) काश्मीरदेशस्येतिहासः .............. इति ग्रन्थे वर्तते ।
अ) विक्रमाङ्कदेवचरितम् ब) राजतरङ्गिणी क) भामिनीविलासः

५) जगति प्रसृतः बायबल इव ............... इति ग्रन्थः ।
अ) पञ्चतन्त्रम् ब) कथासरित्सागरः क) हितोपदेशः

६) रामायणस्य विभागानां नाम ............. इति ।
अ) काण्डम् ब) पर्व क) सर्गः

७) महाभारतस्य आद्यं नाम ...............इति ।
अ) भारतः ब) जयः क) महाभारतः

८) .............. कविः रघुकारः ।
अ) भारविः ब) कालिदासः क) भर्तृहरिः

९) बृहत्कथायाः कर्ता ............. ।
अ) सोमदेवः ब) गुणाढ्यः क) दण्डी

१०) ............... इति कवेः काव्यं चिनीभाषायां अनुवादितम् ।
अ) अश्वघोषः ब) भारविः क) कालिदासः

११) सुभाषितानि ............... इति काव्यप्रकारे गण्यन्ते ।
अ) खण्डकाव्यं ब) उत्कीर्णकाव्यम् क) मुक्तककाव्यम्

१२) ............. इत्यस्य प्रस्तरलेखाः धर्मप्रवचनपराः ।
अ) अशोकः ब) रुद्रदामा क) समुद्रगुप्तः

१३) ............... कविः अर्थगौरवार्थं ख्यातः ।
अ) भारविः ब) भासः क) भवभूतिः

१४) रामायणे ................. श्लोकाः सन्ति ।
अ) २७००० ब) २४००० क) ७०००

१५) जयदेवरचितस्य गीतगोविंदस्य काव्यप्रकारः ................ इति ।
अ) खण्डकाव्यम् ब) मुक्तककाव्यम् क) महाकाव्यम्

१६) ...........कवेः काव्यं 'कपित्थपाकं' इति ख्यातः ।
अ) श्रीहर्षः ब) भारविः क) माघः

१७) स्तोत्रवाङ्मये .............. इत्यस्य स्थानम् अनन्यसाधारणम् ।
अ) बिल्हणः ब) शंकराचार्यः क) कल्हणः

१८) अधोनिर्दिष्टेषु ................ आधुनिककाव्यम् ।
अ) संमार्जनीशतकम् ब) नीतिशतकम् क) वैराग्यशतकम्

१९) बुद्धचरितं ............. इत्यनेन विरचितम् ।
अ) कालिदासः ब) भर्तृहरिः क) अश्वघोषः

२०) संस्कृत-उत्कीर्णकाव्यस्य प्रारम्भः ............... इत्यस्मात् प्रस्तरलेखात् जातः ।
अ) समुद्रगुप्तप्रशस्तिः ब) जुनागढप्रस्तरलेखः क) ऐहोलभित्तिलेखः

२१) मेघदूतस्य काव्यप्रकारः ........... इति ।
अ) चम्पूकाव्यम् ब) खण्डकाव्यम् क) मुक्तककाव्यम्

२२) बाणकवेः आश्रयदाता ............ इति सम्राट् आसीत् ।
अ) तारापीडः ब) हर्षः क) भोजः

२३) दृश्यंकाव्यं नाम ............ इति ।
अ) नाटकम् ब) आर्षकाव्यम् क) महाकाव्यम्

२४) शिशुपालवधस्य कविः ............... इति ।
अ) माघः ब) शिशुपालः क) भारविः

२५) .............. इत्यस्मिन् नाटके नायिका अथवा स्त्रीपात्रं नास्ति ।
अ) दूतवाक्यम् ब) नागानन्दम् क) मुद्राराक्षसम्

२६) यस्मिन् गद्यं तथा पद्यं समानरूपेण भवति, तस्य नाम ........... इति ।
अ) चित्रकाव्यम् ब) चम्पूकाव्यम् क) खण्डकाव्यम्

२७) उत्तररामचरितस्य कर्ता ................... अस्ति ?
अ) तुलसीदासः ब) भवभूतिः क) विशाखदत्तः

२८) कृष्णलीलाधारितं भासस्य नाटकस्य नामधेयं ................ इति ।
अ) अभिषेकम् ब) बालचरितम् क) अविमारकम्

२९) राजनीति-आधारितस्य नाटकस्य नामधेयं .............. इति ।
अ) महावीरचरितम् ब) मृच्छकटिकम् क) मुद्राराक्षसम्

३०) नैषधीयचरितकाव्यस्य अन्यत् नाम ................ इति ।
अ) बुद्धचरितम् ब) दशकुमारचरितम् क) वैरसेनीचरितम्

३१) उत्कीर्णलेखे .............. इति लिपी दृश्यते ।
अ) ब्राह्मी ब) द्रविडः क) देवी

३२) कालिदासस्य ............ शैली वर्तते ।
अ) द्रविडी ब) वैदर्भी क) गांधारी

३३) ................ इति आदिकविः वर्तते ।
अ) व्यासः ब) कालिदासः क) वाल्मीकिः

३४) प्रहेलिका, शब्द-अर्थचमत्कृतिः .............. इत्यस्मिन् वर्तते ।
अ) चित्रकाव्यम् ब) कलाकाव्यम् क) मनोरंजनकाव्यम्

३५) भारतदेशस्य निसर्ग-लोकाचारादीनां वर्णनं .............. इत्यस्मिन् काव्ये वर्तते ।
अ) भारतदर्शनम् ब) विश्वागुणादर्शः क) भारतदर्शः

३६) 'ऐश्वर्यं यदि वाञ्छसि प्रियसखे शाकुन्तलं सेव्यताम्' इति ............. इत्यनेन उक्तम् ।
अ) महाकविः गटे ब) विष्णुशर्मा क) मल्लिनाथः

३७) साहित्यशास्त्रे नाटकस्य अपरं नाम ................. इति ।
अ) काव्यम् ब) पताकास्थानं क) रूपकम्

३८) .......... इति पञ्चमः वेदः ।
अ) आयुर्वेदः ब) रामायणम् क) वेदान्तः

=====***=====***=====

## कथापूर्तिः ।

*** मञ्जूषातः उचितान् शब्दान् चित्वा १० रिक्तस्थानानि पूरयित्वा कथां /परिच्छेदं पुनर्लिखत।**
**Rewrite the story by filling the blanks with the proper words in the bracket.**

१) एकः धनहीनः वनं गत्वा वृक्षान् ------ काष्ठानि ------ तानि काष्ठानि विक्रेतुं नगरम् आगतः । तत्र जनानां महान् समूहः आसीत् । तस्य काष्ठानां भारः अधिकः आसीत् । अतः ''अपसर, अपसर'' इति आक्रोशन् एव सः ------ आसीत् । जनः तस्य आक्रोशं ------ अपसरन्ति स्म । परं एकः गर्विष्ठः न अपसृतः । तस्य वस्त्रं ------ सह घर्षणेन छिन्नं जातम् । अतीव क्रुद्धः सः तं धनहीनं बलात् न्यायाधीशस्य पुरतः आनयत् । एषः काष्ठविक्रेता मम वस्त्राणि ------ इति उक्त्वा सः न्यायम् अयाचत ।

न्यायाधीशः तं दरिद्रं बहून् ------ अपृच्छत् । परं दरिद्रः न किमपि उक्तवान् । अन्ततो गत्वा न्यायाधीशः सक्रोधम् अब्रवीत् ''भोः भ्रातः, किमर्थम् एतं मूकं ------ आनीतवान् ?

''स्वामिन्, एषः न मूकः । लघुमार्गे अपसर, अपसर इति एतस्य ----- मया स्वयं श्रुतः ।'' गर्विष्ठः अवोचत् ।

''भद्र, यदि एवम् अस्ति तर्हि तस्य आक्रोशं श्रुत्वा अपि त्वं दूरं न ------ एषः तव दोषः । तव याचिका निरस्ता ।'' न्यायाधीशः अकथयत् ।

(प्रश्नान्, छित्वा, अपसृतः, गच्छन्, बद्ध्वा, मत्सविधे, श्रुत्वा, छिन्नवान्, आक्रोशः, काष्ठैः)

२) गङ्गारामः एकं गर्दभं विक्रेतुं ------ पुत्रेण हरदत्तेन सह अगच्छत् । गङ्गारामः गर्दभस्य उपरि उपविष्टः । हरदत्तः तस्य पार्श्वतः चलति । एतद् दृष्ट्वा कोऽपि मार्गस्थः अन्यं पथिकं कथयति, कीदृक् पाषाणहृदयः पिता स्वयं गर्दभस्य उपरि उपविष्टः । वराकः पुत्रः चलति । ईदृक् स्वार्थपरः पिता ------ कुत्रापि दृष्टः ? एतत् श्रुत्वा पिता गर्दभपृष्ठात् अवरुह्य पुत्रं च उपवेशयति । तदा जनाः वदन्ति । 'पितृभक्तं पुत्रं ------ । पिता मार्गकष्टं सहते ।' पुत्रः गर्दभपृष्ठे आनन्दं करोति ।

एतत् श्रुत्वा पुत्रः पितरं वदति, पितः जनाः ------ । आवां द्वौ गर्दभपृष्ठे ------ । किञ्चित्कालात् परं कोऽपि पथिकः पितरं वदति । भो महाशय, गर्दभस्य कष्टं भवति । भवान् स्वं गर्दभं वहति चेत् भवतः कष्टं भविष्यति न वा ? वहनं कृत्वा पश्यतु । आवां भवतः सहाय्यं ------ । तदा ते जनाः गर्दभस्य एकस्मिन् स्थूलदण्डे लम्बयित्वा नयन्ति । ------ कोऽपि वंशनिर्मितः सेतुः अस्ति । जनाः ------ सेतोः उपरि चलन्ति । भयभीतः गर्दभः छट्पटायते । जनानां स्कन्धात् च्युतः भूत्वा गभीरे जले पतति ------ च । तदा पिता वदति - किमर्थं मया जनानां वचनं श्रुतम् ? पुत्रः वदति 'आम् पितः, यदि आवां तेषां वचनेन परिचालितौ न अभविष्यावः तर्हि ------ गर्दभः न अमरिष्यत् ।

(करिष्यावः, त्वया, विपणीं, आवयोः, मार्गे, अपवदन्ति, पश्य, सावधानं, उपविशावः, म्रियते)

३) ''सम्प्रति शाकविक्रयः कठिनतरः यतः तस्मिन् ------ दृश्यते । एकघण्टां यावत् अहं जनान् ------ तानुद्दिश्य आक्रन्दामि चत्वारिंशत् रूप्यकाणि किलोमितम्-चत्वारिंशत् रुप्यकाणि किलोमितम् इति । परं महत् काठिन्येन एकोऽपि ------ आगतवान् ।'' श्रान्तः शङ्करः अभाषत । ''भवान् मुहूर्तकं ------ करोतु, शाकविक्रयम् अहं करोमि'' रत्ना साहाय्यं प्रादर्शयत् । शङ्करः अल्पकालार्थं ------ गतः । स्वल्पेनैव कालेन यदा सः उदतिष्ठत् यदा तेन दृष्टं यद् सर्वाणि शाकानि ----- आसन् । शङ्करः साशङ्कम् अपृच्छत् 'अपि त्वया हानिदोषेण ------ मूल्येन शाकं विक्रितं किम् ?' रत्ना अवदत्, ''नैव, भवता आदिष्टेन मूल्येनैव ------ । किन्तु मया दश रुप्यकैः सपादकिलोमितम् इति उद्घोषणमारब्धम् । चत्वारिंशत् रूप्यकाणां स्थाने दशरूप्यकाणि इति मूल्यं श्रुत्वा अधिकाः जनाः अस्माकं ------ प्रति आकृष्टाः । शाकपरिमाणादपि तस्य ------ ते अत्र आकर्षिताः । अहं तेनैव मूल्येन शाकविक्रयणं करोमि इति अनवधार्य तैः शाकं क्रीतम् । शङ्करः तस्याः भार्यायाः व्यवसायचातुर्यं प्राशंसत् ।

( विक्रितानि, आकर्षितुं, मूल्येनैव, महार्हता, विश्रामं, अल्पेनैव, निद्रावशं, विक्रितम्, शाकशकटिकां, शाकक्रयार्थम् )

४) पण्डित-मदनमोहन-मालवीयः बनारस-हिन्दु-विश्वविद्यालस्य ----- कृते विविधमार्गैः धनसंग्रह करोति स्म । कदाचित् स धनयाचनार्थं हैदराबादशासकं ------ प्रति अगच्छत् । परं निजामेन किञ्चिदपि धनं न प्रदत्तम् । तदा मालवीयः चिन्तितवान् यत् केनोपायेन ------ धनं प्राप्तव्यम् ।

तत्समये एव हैदराबादे एकस्य महाधनिकस्य निधनं जातम् । यदा तस्य शवयात्रा आरब्धा तदा ----- शवस्योपरि नाणकवर्षा ------ तस्य आप्ताः गच्छन्ति स्म । तत्र गत्वा मालवीयः ------ पतितानां नाणकानां सङ्ग्रहं कृतवान् । तदा एकेन मित्रेण अपृच्छत् 'भवान् एतत् किमर्थं ------ ।' तदा मालवीयः अब्रवीत् 'युष्माकं निजामेन ------ किमपि धनं न प्रदत्तम् । निजामेन किं दत्तमिति

जनैः पृष्टे सति ----- किं वक्तव्यम् ? ------ तु न दत्तं परं मयैव शवयात्रायां एषः धनसङ्ग्रहः कृतः इति तेभ्यः कथयिष्यामि ।

एतां वार्ता श्रुत्वा लज्जितः निजामः क्षमायाजनां कृत्वा तस्मै प्रभूतं धनं प्रदत्तवान् ।

(धनिकस्य, कुर्वाणाः, मया, स्थापनायाः, निजामं, करोति, निजामात् , निजामेन, मह्यं, शवयात्रायां)

५) मानसशास्त्रज्ञः ------ स्पर्शं प्रतिपादयन्ति । एकः सकारात्मकः अपरः नकारात्मकः च । सकारात्मकः ----------- कल्पते । ------ सहितं कृतं हास्यं वात्सल्यव्यञ्जकः स्वरो मैत्रीपूर्णो नेत्रकटाक्षश्च ------ सकारात्मकस्पर्शोदाहरणानि । तानि स्वीकृतेश्चिह्नानि भवन्ति । सद्भावनां च -----। ------ स्पर्शो कटुतां वर्धयति । निरपेक्षः स्पर्शः परस्य स्वीकारं ध्वनति । सापेक्षे स्पर्शे रुक्षतान्तर्भवति । बालाः सदा सर्वथा निरपेक्षस्पर्शम् ------ । सकारात्मकः स्पर्शो प्रीतिं विवर्धयति । सामाजिकोऽहमपि काञ्चित् योग्यताम् अर्हामि इति विचारं प्रवर्तयति । -------- च प्रेरणां करोति । एवञ्च परनिन्दाभयं निष्कासयति । जनसम्बाधे स्त्रीभिरनुभूयमानाः केचन स्पर्शाः एवं विद्याः सन्ति । स्पर्शकराः कामुकजना ------ वर्तन्ते। तेन एते रक्षकपुरुषाणां स्त्रीणाञ्च ------ अनुभवन्ति।

(अभिलषन्ति, अन्यः, सुवन्ति, एतादृशानि, द्विविधं, आत्मविश्वासाय, नकारात्मकः, स्मितेन, ताडनम्, दृष्टवासनाग्रस्ताः)

## अपठितगद्यांशाः ।

**⁕ अपठितगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।**

**अथवा**

**माध्यमभाषया प्रश्ननिर्माणं कुरुत तथा तेषां प्रश्नानाम् उत्तराणि अपि माध्यमभाषया लिखत। (केवलं ५)**

१) कविश्रेष्ठ रवीन्द्रमहोदयः अवदत् ''वाल्मीकेः रामायणं भारतीयानां भावभावनानां भागीरथी एव ।'' सर्वासु भारतीयभाषासु रामायणं अतीव भक्त्या गीयते । रामायणे वर्णितः राजधर्मः यतिधर्मः कुलधर्मादयः सर्वेषां भारतीयानां मर्मबन्धाः सन्ति । उत्तरप्रदेशे तुलसीरामायणस्य नित्यं पठनं कोटिकोटिजनाः नित्यं कुर्वन्ति । तामिळनाडुप्रान्ते कविचक्रवर्तेः कम्बरामायणमपि अतीव लोकप्रियम् । महाराष्ट्रभाषायां कविवर्येण ग. दि. माडगूळकरमहोदयेन गीतरामायणं रचितम् ।

२) पञ्चमहाभूतेषु एकं जलम् । मनुजस्य जीवने तद् अतीव महत्त्वपूर्णम् । तृषाशमनार्थं पाचनार्थं स्वच्छतायै जलम् उपयुज्यते । तथा कृषिकार्याणि कर्तुं जलं आवश्यकम् । जलेन विद्युत्-निर्मितिः शक्या अस्ति । पृथ्वीवत् परग्रहेषु अपि जीवसृष्टिः विद्यते वा इति ज्ञातुं मानवस्य जिज्ञासा वर्तते । तदा अग्रक्रमेण जलम् अन्विष्यते । एवं जलं जीवनम् इति यद् उच्यते तत् सार्थमेव ।

३) भारतस्य दुग्धक्रान्तेः जनकः डॉ. वर्गीस–कुरियनमहाभागः । महाभागेनानेन 'अमूल' इति दुग्धप्रकियाप्रकल्पस्य माध्यमेन दुग्धव्यवसाये व्यवस्थापने च अतुलनीयं कार्य कृतम् । अस्य अध्यक्षपदे 'दुग्धस्य महापूरः' इति योजनां सफलीकर्तुं राष्ट्रीय – दुग्धोद्योग –विकास – मण्डलस्य स्थापना अभवत् । 'गुजराथ–को–ऑपरेटिव्ह–मिल्क–मार्केटिंग–फेडरेशन', 'नॅशनल–इन्स्टिटट्युट–ऑफ–रूरल–मॅनेजमेंट', 'ग्रामीण– राज्यस्तरयोः स्थापिता दुग्धोत्पादन–महासङ्घाः' च इत्यादिभिः संस्थाभिः असौ महाभागः दुग्धक्रान्तिं सफलीकृतवान् । एतस्य कार्यार्थं भारतशासनेन 'पद्मविभूषण' पदव्या एषः सत्कृतः । 'वर्ल्ड पीस प्राईज', 'रेमन मॅगसेसे पुरस्कारः' अमेरिका शासनस्य 'इंटरनॅशनल पर्सन ऑफ द इयर' इत्यादिभिः अन्यैः प्रतिष्ठितपुरस्कारैः डॉ. कुरियनमहाभागः सम्मानितः ।

४) दक्षिणमहाराष्ट्रे कुरुंदवाडसंस्थाने कीर्तनकाराणां कुले विष्णुः दिगम्बरः पलुस्करमहोदयस्य जन्म अभवत् । बाल्ये एव तस्य बालकस्य ध्वनिः बहुमधुरः आसीत् । सः बुद्धिमान्, तीक्ष्णमतिः, अतः बहुजनप्रियः आसीत् । कदाचित् तस्य नेत्रयोः आकस्मिकतया आघातः अभवत् । मीरजनगरे बडबडे नामकः वैद्यः तस्य बालकस्य चिकित्सां करोति स्म । बालकस्य गानं श्रुत्वा सः अतीव तुष्टः । 'एषः बालकः महान् संगीतज्ञः भविष्यति' इति सः चिन्तितवान् । सः मीरजकरमहाराजम् उक्त्वा सङ्गीतशिक्षणार्थं बालकम् आस्थानगायकसमीपं प्रेषितवान् । तत्र सङ्गीतज्ञानम् आसाद्य एषः महोदयः १९०८ तमे वर्षे मुम्बई–नगरे गांधर्वविश्वविद्यालयम् आरब्धवान् । अयं पुरुषः भारतीयसङ्गीतस्य उद्धारकः, कलातपस्वी, गानगन्धर्वः, गायनाचार्यः आदिभिः उपाधिभिः ख्यातः अस्ति सर्वत्र ।

**⁕ शिक्षणातून भविष्यासाठी उपयुक्त,ज्यांचा विकास व्हायला हवा, अशा क्षमता आणि कौशल्ये–**
१) स्वतःहून शिकता येणे. २)शिकण्याचे मार्ग शोधता येणे.३)विचार करता येणे.४)भाषेचा वापर करता येणे. ५)शरीराचा वापर करता येणे. ६)मिळालेल्या अनुभवातून योग्य ते ज्ञान घेता येणे. ७)शोध घेता येणे. ८)पर्यायांची निवड करता येणे. ९)निर्णय घेता येणे. १०)कल्पनाशक्ति वापरणे. ११)नवनिर्मिती करता येणे.

**⁕ शिक्षणात बदल करायचा झाल्यस ४ तऱ्हेचे बदल अपेक्षित असतात.**
१) शिक्षणाच्या उद्दिष्टात, २) आशयात, ३)शिकण्या–शिकविण्याच्या पद्धतीत, ४)शिकविण्याच्या मूल्यमापनात .आपण यावेळी आशयात बदल केलेला नाही.

**शिक्षण हे परीक्षेपुरते किंवा अपेक्षित प्रश्नांची उत्तरे देण्यासाठी न राहता, ते विद्यार्थ्यांच्या विविध क्षमता वाढविण्यासाठी असावे,ज्यायोगे भविष्यातील आव्हानांना त्यांना तोंड देता येईल.**

## महाराष्ट्र राज्य माध्यमिक तथा उच्च माध्यमिक शिक्षण मंडळ,
## पुणे – ४११००४

**संस्कृतम्**

**एकादशीकक्षा** **कृतिपत्रिकायाः प्रारूपम्** **गुणाः ८०**

**अवधिः होरात्रयम् ।**

**प्रथमः विभागः – गद्यम्।** **(२३)**

**(अवबोधनम्, शब्दसम्पत्तिः , पृथक्करणम्, स्पष्टीकरणम्)**

**प्रश्नः१अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

(१२०-१५० शब्दपरिमितः गद्यांशः)

अ१) अवबोधनम् । (केऽपि २ कृती कुरुत ।) २

अ२) शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।) २

अ३) पृथक्करणम् । ( क्रमसंयोजनम् /प्रवाहिजालम्।) २

**प्रश्नः१ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

(१२०-१५० शब्दपरिमितः गद्यांशः )

ब१) अवबोधनम् ।(केऽपि २ कृती कुरुत ।) २

ब२) शब्दज्ञानम् ।(केऽपि २ कृती कुरुत ।) २

ब३) पृथक्करणम् । (वृक्षरेखाचित्रम्/ स्तम्भपूरणम् ) २

**प्रश्नः१क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

(१२० -१५० शब्दपरिमितः गद्यांशः )

क१) अवबोधनम्।(केऽपि २ कृती कुरुत।) २

क२) शब्दज्ञानम्।(केऽपि २ कृती कुरुत ।) २

क३) पृथक्करणम् ।(जालरेखाचित्रम्। कोष्ठकपूरणम् ) २

**प्रश्नः१ड) माध्यमभाषया वाक्यं ससंदर्भं स्पष्टीकुरुत ।**(केवलं १) ५

(द्वे वाक्ये प्रष्टव्ये )

**अवबोधनस्य कृतयः – काः अपि ३ कृतयः प्रष्टव्याः ।**

i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।

ii) संस्कृतभाषया एकवाक्येन उत्तरं लिखत ।

iii) रेखाङ्कितं पदम् आधृत्य संस्कृतभाषया प्रश्ननिर्माणं कुरुत।

iv) नामस्थाने सर्वनाम / सर्वनामस्थाने नाम प्रयुज्य वाक्यं पुनर्लिखत ।

**शब्दज्ञानस्य कृतयः –काः अपि ३ कृतयः प्रष्टव्याः ।**

i) पर्यायशब्दाः/विलोमशब्दाः / भिन्नार्थकशब्दाः

कृतयः –चयनम्/मेलनम्/समूहेतरपदस्य/चतुर्थपदस्य लेखनम् ।

ii) सन्धिविग्रहः ।

कृतयः – चतुर्थपदं लिखत/पूर्वपदं लिखत/उत्तरपदं लिखत।उचितं विकल्पं चित्वा लिखत ।

iii) विशेषण–विशेष्य–अन्वितिः ।

कृतयः –चयनम्/मेलनम् /चतुर्थपदस्य लेखनम् ।

iv) धातुसाधित–अव्ययानां(त्वान्त/ल्यबन्त/तुमन्त)/विभक्त्यन्तपदानां चयनम् ।

**द्वितीयः विभागः–पद्यम्। (१९)**

**(अवबोधनम् ,शब्दसम्पत्तिः, पृथक्करणं, अन्वयपूर्तिः, स्मरणं, वृत्तज्ञानम्)**

**प्रश्नः२अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

(६–८ पङ्क्तिपरिमितः पद्यांशः )

अ १)अवबोधनम् ( केवलं १) ( केऽपि २ कृती प्रष्टव्ये। ) १

अ २) पृथक्करणम् । (जालरेखाचित्रम्/क्रमसंयोजनम् ।) २

**प्रश्नः२ब) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।**

(६–८ पङ्क्तिपरिमितः पद्यांशः )

ब १) शब्दज्ञानम् ।( केवलं १) ( केऽपि २ कृती प्रष्टव्ये। ) १

ब २) पृथक्करणम् । (जालरेखाचित्रम्/स्तम्भपूरणम्।) २

**प्रश्नः२ क) पद्यांशस्य माध्यमभाषया अनुवादं कुरुत अथवा अन्वयपूर्तिं कुरुत।** ४

(४ पङ्क्तिपरिमितः पद्यांशः )

अन्वये विद्यमानानि अष्ट रिक्तस्थानानि श्लोकतः शब्दान् चित्वा पूरयत ।

**प्रश्नः२ ड) स्मरणम् – पाठ्यपुस्तकतः वृत्तस्य श्लोकं शुद्धं पूर्णं च लिखत।** ४

**प्रश्नः२ इ) माध्यमभाषया वाक्यं ससंदर्भं स्पष्टीकुरुत ।** (केवलं १) ५

(द्वे वाक्ये प्रष्टव्ये।)

**तृतीयः विभागः– स्थूलवाचनम् । (०५)**

**( गद्यम्/पद्यम्– अवबोधनम् )**

(८०–१२० शब्दपरिमितः एकः गद्यांशः वा १६–१८ पङ्क्तिपरिमितः एकः पद्यांशः)

**प्रश्नः३) गद्यांशं/पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

अ)वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं / योग्यं वा अयोग्यं लिखत। २

ब) संस्कृतभाषया एकवाक्येन उत्तरं लिखत। ३

**चतुर्थः विभागः-परिशिष्टम् ।** **( ०६)**

**प्रश्नः ४) उचितं विकल्पं चित्वा पूर्णवाक्येन उत्तरत।** (केवलं ६/८)

**पञ्चमः विभागः- लेखनकौशलम् ।** **(१५)**

**प्रश्नः५) यथानिर्देशं कृतीः कुरुत ।**

अ)१) **निबन्धलेखनम्-**३ पर्यायेषु १ विषयम् अधिकृत्य १० वाक्यात्मकं निबन्धं लिखत। १०

अथवा

अ)२) **कथापूर्तिः/परिच्छेदपूर्तिः-**

मञ्जूषातः उचितान् शब्दान् चित्वा १० रिक्तस्थानानि पूरयित्वा कथां /परिच्छेदं पुनर्लिखत। १०

अथवा

अ)३) **संस्कृतभाषया अनुवादं कुरुत।** १०

**ब) अपठितगद्यांशं पठित्वा** माध्यमभाषया अनुवादं कुरुत । ०५

अथवा

माध्यमभाषया प्रश्ननिर्माणं कुरुत तथा तेषां प्रश्नानाम् उत्तराणि अपि माध्यमभाषया लिखत। (केवलं ५)०५

**षष्ठः विभागः व्याकरणम् - उपयोजनकौशलम् ।** **(१२)**

**प्रश्नः६) यथानिर्देशं कृतीः कुरुत ।** ( केवलं ४ उपप्रश्नाः लेखनीयाः।)

**अ)क्रियापदरूपैः कोष्ठकपूरणम् ।** (८ विकल्पेषु ६ लेखनीयाः) ३

(प्राधान्येन द्वितीयभविष्यत्काल-परोक्षभूतकाल-प्रथमभूत-वर्तमान-आज्ञार्थ विध्यर्थरूपाणि प्रष्टव्यानि )

**ब) समासाधारितं कोष्ठकपूरणम्।** (८ विकल्पेषु ६ लेखनीयाः) ३

**क) रिक्तस्थानपूर्तिः ।** (४ विकल्पेषु ३ लेखनीयाः) ३

मञ्जूषातः उचितं विकल्पं चित्वा वाक्यं पुनर्लिखत।

**ड) वाक्यपरिवर्तनम् ।** (४ विकल्पेषु ३ लेखनीयाः) ३

I) उपपदविभक्तिः (Governing Cases )

II) सतिसप्तमीरचना ।(Absolute locative)

III) त्वम् ↔ भवान् इति परिवर्तनम् । (interchange त्वम् ↔ भवान् )

IV) स्म अव्ययं प्रयुज्य / निष्कास्य वाक्यं पुनर्लिखत। (Remove /use स्म )

**इ) तद्धितानि /कृदन्तानि परिचाययत। तेषाम् अर्थान् माध्यमभाषया लिखत।**

(४ विकल्पेषु ३ लेखनीयाः) ३

=====*************************************************======

| विभागाः | विकल्परहितम् | सविकल्पम् |
|---|---|---|
| गद्यम् | २३ | ३४ |
| पद्यम् | १९ | ३० |
| स्थूलवाचनम् | ०५ | ०५ |
| परिशिष्टम् | ०६ | ०८ |
| लेखनम् | १५ | ४० |
| व्याकरणम् | १२ | १५ |
| एकत्रिताः गुणाः | ८० | १३२ |

**संविधान तक्ता**

| विभागानुसारि | गुणविभाजनम् | उद्दिष्टानुसारि | गुणविभाजनम् | प्रकारानुसारि | गुणविभाजनम् |
|---|---|---|---|---|---|
| गद्यम् | २३ | ज्ञानम् | ११ | वस्तुनिष्ठ | ३५ |
| पद्यम् | १९ | आकलनम् | २० | लघूत्तरी | १५ |
| स्थूलवाचनम् | ०५ | उपयोजनम् | २७ | दीर्घोत्तरी | ३० |
| परिशिष्टम् | ०६ | कौशलम् | २२ | | ८० |
| लेखनम् | १५ | | ८० | | |
| व्याकरणम् | १२ | | | | |
| | ८० | | | | |

*** शिकणाऱ्याच्या पातळीवर ज्ञाननिर्मितीच्या सहा पायऱ्या याप्रमाणे-**

१) माहीत होणे - म्हणजे ज्ञानेंद्रियांच्या साहाय्याने आणि आजच्या प्रगत जगात स्वतःच्या भाषेच्या साहाय्याने जगाची ओळख करून घेणे.

२) आकलन होणे - नुसती माहिती जमा होणे पुरेसे नसते. त्यातील संबंधित माहितीचा अर्थ जाणून घेणे महत्त्वाचे असते.

३) आत्मसात होणे- ज्याचा अर्थ समजला आहे अशा आणि भविष्यात ज्याचा उपयोग होईल अशा आवश्यक वाटणाऱ्या बाबी मनात रुजणे किंवा मेंदूमधील दीर्घकालिक स्मरणकोषात साठविल्या जाणे.

४) मनन करणे - मनात जाऊन बसलेल्या बाबींवर काही हेतू धरून विचार करणे, यातून हेतुपूर्ण स्मृती पक्की होत जाणे.

५) संबंध बांधणे - ज्यांवर विचार होतो, अशा बाबींचा आपल्याच पूर्वानुभवाशी संबंध बांधणे तसेच, जीवनातील महत्त्वाच्या बाबींशी संबंध जोडणे.

६) व्यक्त करणे - आशयबद्ध होऊन जे मनात जमते ते संघटित करून त्याची लेखी वा तोंडी वा अभिनय, कलाकृती, वाङ्मयनिर्मिती याकरवी अभिव्यक्ती करणे.

## महाराष्ट्र राज्य माध्यमिक तथा उच्च माध्यमिक शिक्षण मंडळ, पुणे – ४११००४

### प्रतिदर्श–कृतिपत्रिका

एकादशीकक्षा — गुणाः ८०

अवधिः होरात्रयम् ।

सूचना : १) सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम् ।

२) यथासूचनम् आकलनकृतयः व्याकरणकृतयः आरेखितव्याः ।

३) आकृतीनाम् आलेखनं मसिलेखन्या कर्तव्यम् ।

### प्रथमः विभागः – गद्यम्। (२३)

(अवबोधनम्, शब्दसम्पत्तिः , पृथक्करणम्, स्पष्टीकरणम् )

**प्रश्नः१अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**अ १) अवबोधनम् ।** (केऽपि २ कृती कुरुत ।)

i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । ०१

बालिका चलितुं शक्नुयात्, यतः ................

अ)यदा सा चलितुं प्रयतते तदा सा पतति । ब) पतनस्य भीत्या सा चलनं न त्यजति ।

ii) तस्य अवधानम् आकृष्टम् । (‘तस्य’ स्थाने ‘राघव’ शब्दस्य प्रयोगं कुरुत । ) ०१

iii) रेखाङ्कितं पदम् आधृत्य संस्कृतभाषया प्रश्ननिर्माणं कुरुत। ०१

मनुष्यः विघ्नानां भयेन प्रयत्नं त्यजति ।

समुद्रस्य समीपे धीवराणां समूहः निवसति स्म । तत्र केनचित् दृश्येन तस्य अवधानम् आकृष्टम् । कस्यचित् गृहस्य अङ्गणे एका एकवर्षीया बालिका तिष्ठति स्म । सा चलितुं प्रायतत । यदा यदा सा चलितुं प्रयतते स्म तदा तदा सा पतति स्म । तदा सा रोदिति किन्तु पुनः चलितुं प्रयतते स्म । राघवः एतद् दृश्यं पश्यन् एव स्थितः । ‘यद्यपि सा जानाति यद् अहं पतिष्यामि प्रहारं प्राप्स्यामि तथापि सा पुनः पुनः प्रयतते । मूर्खबालिका ! चलितुं सा किमर्थमुत्सुका इत्येव आश्चर्यस्य विषयः ।’ इति अनवधानतया सः स्वचिन्तनम् उच्चैः उक्तवान् , ‘‘ महोदय, यदि पतनस्य भीत्या सा चलनम् त्यजेत् तर्हि सा कथं चलितुं शक्नुयात् ? तस्मिन् एव वयसि प्रायत्नसातत्यं सहनशीलतां च बालकः पठति ।’’ एतद् वचनं श्रुत्वा राघवः परिवृत्य दृष्टवान् । कश्चन् वृद्धः धीवरः तस्य पृष्ठतः स्थितः ।

‘‘ पश्यतु तान् कल्लोलान् । सागरकल्लोलाः दिवानिशं तीरं प्राप्तुं प्रायतन्ते । किन्तु मध्ये एव कुत्रचित् ते भग्नाः भवन्ति, पुनः सागरे विलिनाः भवन्ति । किन्तु ते पुनः पुनः अधिकेन उत्साहेन प्रयतन्ते । ’’ वृद्धः धीवरः पुनः अवदत्, हे युवन्, मनुष्यस्य जीवनमपि तथैव अस्ति । विघ्नानां भयेन यः प्रयत्नं त्यजति , तस्य जीवनं कृतार्थतां न गच्छति । अहं भवन्तं तत्त्वज्ञानं पाठयामि इति मा चिन्तयतु । एतद् जीवनस्य मूलभूतं तत्त्वम् ’’इति उक्त्वा धीवरः अगच्छत् ।

‘एतदेव सत्यम् । सा बालिका, सागरतरङ्गा अपि अस्मान् पाठयन्ति’ इति जागृतिः तस्य मनसि प्रादुर्भूता । ‘यदा आपत्तयः मां प्राहरन् तदा मम आत्मविश्वासः नष्टः । अहं पलायनं कर्तुम् ऐच्छम् । ये मयि आश्रिताः तेषां मम गृहजनानां चिन्ताम् अहं न कृतवान् ।’ इति राघवः स्वस्य प्रमादं ज्ञात्वा चिन्तितवान् । आत्मघातस्य विचारं त्यक्त्वा राघवः नूतनेन आत्मविश्वासेन गृहं प्रतिनिवृत्तः ।

**अ २) शब्दज्ञानम् ।** (केऽपि २ कृती कुरुत ।)

i) पर्यायशब्दान् लिखत । ०१

समीपे, प्रहारः

ii) गद्यांशतः विशेषणं चिनुत । ०१

धीवरः .......... । आत्मविश्वासेन ................।

iii)गद्यांशतः हेत्वर्थक-तुमन्त-अव्यये चिनुत । ( केवलं २ ) ०१

**अ ३) घटनाक्रमानुसारेण क्रमसंयोजनं कुरुत ।** ०२

राघवस्य स्वचिन्तनम् ।

बालिकायाः पतनम् ।

वृद्धधीवरस्य कथनम् ।

राघवस्य गृहं प्रति गमनम् ।

**प्रश्नः१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**ब १) अवबोधनम् ।** (केऽपि २ कृती कुरुत ।)

i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । ०१

डॉ. कमलया विक्रम: स्थापित: यत:............................

अ) तया चतुर्दशमासेभ्य: शोधप्रबन्ध: लिखित: ।

ब) सा आचार्योपाधिं प्राप्तवती प्रथममहिला- शास्त्रज्ञा ।

ii) पूर्णवाक्येन उत्तरं लिखत । ०१

कस्य संशोधनार्थं कमला राष्ट्रपतिपुरस्कारेण सम्मानिता ?

iii) तया शोधप्रबन्धः लिखित्वा विक्रमः प्रस्थापितः ।(' तया' स्थाने 'कमला' पदस्य प्रयोग कुरुत ) ०१

**१९३९ तमे ख्रिस्ताब्दे केंब्रिजविद्यापीठतः आचार्योपाधिं प्राप्तवती कमला प्रथमा भारतीयमहिला । प्रवेशानन्तरं चतुर्दशमासेभ्य एव तया शोधप्रबन्धः लिखित्वा विक्रमः प्रस्थापितः । अस्मिन् शोधप्रबन्धे वनस्पतिकोषिकासु (सायटोक्रोम) प्रकिण्वानि तया संशोधितानि ।**

**एकः बालकः 'क' जीवनसत्त्वस्य अत्यधिकन्यूनतया 'स्कर्व्ही' नाम्ना व्याधिना ग्रस्तः आसीत् । अस्मिन् व्याधौ रक्तस्रावः भवति । विविधोपायैरपि स व्याधिमुक्तो नाभवत् । अङ्कुरितेषु चणकेषु 'प' जीवनसत्त्वमस्ति । तेन रक्तवाहिन्याः आवरणं दृढं भवति । तत्र जम्बीरसः लवणञ्च योजयामश्चेत् रक्तस्रावस्य प्रतिबन्धो भवेदिति संशोधनस्याधारेण प्रयोगः कृतः । पञ्चदिवसेष्वेव तस्य बालकस्य रक्तस्रावोऽवरुद्धः । रशिया-देशे एतदेव संशोधनं १९७७ तमे ख्रिस्ताब्दे अभवत् । परं कमलया पूर्वमेव १९४३ तमे ख्रिस्ताब्दे एव प्रयोगेन सिद्धं कृतमासीत् । १९७० तमे ख्रिस्ताब्दे 'नीरा' इत्यस्य संशोधनार्थं सर्वोत्कृष्टसंशोधनस्य कृते राष्ट्रपतिपुरस्कारेण सम्मानीतेयम् । 'नीरा' इति ताडवृक्षस्य मधुरद्रव्ये तस्याः संशोधनमासीत् ।**

**ब २) शब्दज्ञानम् ।** (केऽपि २ कृती कुरुत ।)

i) सन्धिविग्रहः कुरुत । ०१

विविधोपायैरपि = ....................

ii) गद्यांशतः विशेषणं चिनुत । ०१

आवरणं ............, रक्तस्रावः ................. ।

iii) गद्यांशतः सप्तमीविभक्त्यन्तपदानां चयनं कुरुत । ( केवलं २ ) ०१

**ब ३) स्तम्भपूरणम् ।** ०२

स्कर्व्ही-रोगविषये

| कारणम् | भारते संशोधनवर्षम् | व्याधेः स्वरूपम् | व्याधेः उपायः |
| --- | --- | --- | --- |
| ------ | ---------- | -------------- | ------------ |

**प्रश्नः१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**क १) अवबोधनम् ।** (केऽपि २ कृती कुरुत ।)

i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । ०१

अग्निः लज्जितः भूत्वा न्यवर्तत, यतः............

अ) सः तृणं दग्धुं न शशाक । ब) सः विलम्बेन यक्षं प्रति अभ्यद्रवत् ।

ii) रेखाङ्कितं पदम् आधृत्य संस्कृतभाषया प्रश्ननिर्माणं कुरुत । ०१

स <u>देवेभ्यो</u>ऽकथयत् ।

iii) अस्माकमेवायं महिमा । ( 'अस्माकम्' स्थाने 'देव' शब्दः प्रयुज्य वाक्यं पुनर्लिखत ।) ०१

पुरा देवदानवानां युद्धमभवत् । तस्मिन् युद्धे देवाः ब्रह्मणः सामर्थ्येन विजयं प्राप्तवन्तः। विजयिनः देवाः प्राप्तं तं विजयं स्वसामर्थ्येन अमन्यन्त । ते अचिन्तयन्, अस्माकमेवायं विजयः, अस्माकमेवायं महिमेति । तद् विज्ञाय परब्रह्म यक्षरूपेण प्रादुर्बभूव तत्र । ते देवाः तत् न विज्ञातवन्तः किमिदं यक्षमिति । देवाः अग्निमब्रुवन् " जातवेद, विजानीहि किमेतद् यक्षम् ? " इति । तथेत्युक्त्वा अग्निस्तत् प्रति अभ्यद्रवत् ।

तदपृच्छत् - " कोऽसि ? " " अग्निर्वा जातवेदाः अहमस्मि ।" इत्यब्रबीत् सः ।

" तस्मिन् त्वयि किं वीर्यम् ? " इत्यपृच्छत् तत् ।

" एतत्सर्वं दहेयं यदिदं पृथिव्याम् " इत्यब्रवीदग्निः । तस्मै तृणं निदधौ । " एतद् दह !" इत्युक्तं यक्षेण । तदुपप्रेयाय तीव्रजवेन किन्तु तन्न शशाक दग्धुं सः । अतो लज्जितो भूत्वा न्यवर्तत । "नैतत् शक्नोमि विज्ञातुं किमेतद् यक्षमिति " स देवेभ्योऽकथयत् ।

अथ देवाः वायुम् अभाषन्त, "वायो, विजानीहि किमेतत् यक्षम्"इति । तथेत्युक्त्वा वायुस्तत्प्रति अभ्यद्रवत् । सोऽपृच्छत् "कोऽसि ? " " वायुर्वाहं मातरिश्वास्मि ।" इत्यब्रवीद् वायुः । " तस्मिन् त्वयि किं वीर्यं ? " इत्यपृच्छद् यक्षम् । "सर्वमाददीय यदिदं पृथिव्याम् ।" इति अब्रवीत् वायुः। तस्मै तृणं निदधौ । " एतद् वह " इति अब्रवीत् तद् । तदुपप्रेयाय तीव्रजवेन किन्तु तन्न शशाक वोढुं सः । अतो व्रीडितो भूत्वा वायुः न्यवर्तत । "नैतत् शक्नोमि विज्ञातुं किमेतद् यक्षम् " इति स देवेभ्योऽकथयत् ।

**क २) शब्दज्ञानम् ।** ( केऽपि २ कृती कुरुत )

i) गद्यांशतः पर्यायशब्दान् चिनुत । ०१

लज्जितः ..........., धरा ..........

ii)सन्धिविग्रहं कुरुत । ०१

वायुर्वाहं = ..............

iii) गद्यांशतः पूर्वकालवाचक-त्वान्त-अव्यये चिनुत । ( केवलं २ ) ०१

**क ३) कोष्ठकं पूरयत ।** ०२

| देवः | अपरनाम | वीर्यम् |
|---|---|---|
| अग्निः | | |
| वायुः | | |

**प्रश्नः१ ड) माध्यमभाषया वाक्यं ससंदर्भं स्पष्टीकुरुत ।** (केवलं १) ०५

१) किं रोषणाय रुचिरं त्रिषु पातकेषु ।

२) दैवान्यष्टौ महाभयानि ।

## द्वितीयः विभागः – पद्यम्। (१९)

**(अवबोधनम्, शब्दसम्पत्तिः , पृथक्करणम्, अन्वयपूर्तिः, स्मरणं, स्पष्टीकरणम् )**

**प्रश्नः २ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**अ १) अवबोधनम् –**

i) एकवाक्येन उत्तरं लिखत । ०१

माया नाम्नी महिषी किमर्थं गर्भं दधे ?

इक्ष्वाकुवंशार्णवसम्प्रसूतः प्रेमाकरश्चन्द्र इव प्रजानाम् ।
शाक्येषु साकल्यगुणाधिवासः शुद्धोदनाख्यो नृपतिर्बभूव ।। १ ।।
आसीन्महेन्द्रादिसमस्य तस्य पृथ्वीव गुर्वी महिषी नृपस्य ।
मायेति नाम्नी शिवरत्नसारा शीलेन कान्त्याऽप्याधिदेवतेव ।। २।।
देवैरभिप्रार्थ्यमनल्पभोगं सार्धं तयाऽसौ बुभुजे नृपालः ।
सा चाथ विद्येव समाधियुक्ता गर्भं दधे लोकहिताय साध्वी ।। ३ ।।
सा लुम्बिनीनाम्नी वने मनोज्ञे ध्यानप्रदे देववनादनूने ।
वासेच्छया प्राह पतिं प्रतीता सत्त्वानिभं दोहदमामन्ति ।। ४ ।।

**अ २) जालरेखाचित्रं पूरयत ।** ०२

भगवतः गौतमबुद्धस्य

| पितुः नाम | मातुः नाम | वंशः | जन्मस्थानम् |
|---|---|---|---|
| -------- | ------- | ---------- | --------- |

**प्रश्नः २ ब) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**ब १) शब्दज्ञानम्–**

पद्यांशतः नृपशब्दस्य द्वौ पर्यायशब्दौ चिनुत । ०१

**अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् ।**
**वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ।। १ ।।**
**निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ।**
**पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम् ।। २ ।।**
**अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः ।**
**गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ।। ३ ।।**
**सा दुष्प्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन ।**
**अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ।। ४ ।।**

**ब २) क्रमसंयोजनं कुरुत ।** ०२

धेनुः अनुचरभावं ज्ञातुम् इष्टवती ।

वत्सः दुग्धं पीतवान् ।

धेनुः गह्वरं प्रविष्टा ।

नृपजायया धेनुः पूजिता ।

**प्रश्नः२ क) पद्यांशस्य माध्यमभाषया अनुवादं कुरुत अथवा अन्वयपूर्तिं कुरुत ।** ०४

**आहूतः सकृदेव यः प्रचलति स्नानाय भोज्याय वा**
**नादिष्टः समये हरत्यथ चहाशाकादिवस्तूच्चयम् ।**
**वक्त्यल्पं न निषेधति व्ययविधौ रक्षत्यपत्यं मुदा**
**कस्याश्चित् क्वचिदेव भाग्यवशतो भर्ता भवेदीदृशः ।।**

**अन्वयः –** सकृदेव ............ यः स्नानाय वा .......... प्रचलति । अथ समये ......... चहाशाकादिवस्तूच्चयम् ......... । ............. वक्ति, व्ययविधौ न ........... , अपत्यं मुदा ................ । कस्याश्चित् क्वचिदेव भाग्यवशतः ....... भर्ता भवेत् ।

**प्रश्नः२ ड ) 'वंशस्थ'वृत्तस्य श्लोकं शुद्धं पूर्णं च लिखत।** ०४

**प्रश्नः२ इ ) माध्यमभाषया ससंदर्भं स्पष्टीकुरुत** । ( केवलं १) ०५

१) स वै पण्डित उच्यते ।

२) विन्ध्याभिधेयो राजति शैलराजः ।

## तृतीयः विभागः – स्थूलवाचनम्। (०५)

**प्रश्नः ३) गद्यांशं पठित्वा निर्दिष्टां कृतिं कुरुत ।**

**उत्क्रान्तिचक्रे सर्वेषु सजीवेषु प्रगततमेन मानवेन स्वबुद्ध्या सुविधासाधनार्थं निजावश्यकतानां परिपूर्त्यर्थमतिक्रमणं कृतम् । निसर्गे विद्यमानेषु वनस्पतिषु तथा प्राणिषु आवश्यकान्, उपयुक्तान् च सजीवान् चित्वा तेषामुत्पादने एव स्वार्थपरायणः मानवः मग्नोऽस्ति । सर्वेषां सजीवानां कृते, प्राणिनां च कृते अपि**

**जलस्थलवायुरूपाणि संसाधनानि आवश्यकानि । न तानि वर्धन्ते प्रत्युत प्रयोगेण हीयन्ते । कालौघे मानवस्य आत्मकेन्द्रिततया तस्य कृते अनावश्यकानि अनुपयुक्तानि च वस्तूनि विनष्टानि । मानवस्य अज्ञानतया हिंसया, जिह्वालौल्येन, उपभोगपरायणतया च प्रतिवर्षं केषाञ्चन प्राणिनां पक्षिणां च संख्या न्यूनीभवति । वृक्षपुष्पफलखगप्राणिनां वैविध्यवशादेव शोभते इदं जगत् । मानवजीवने सृष्टौ विद्यमानानामन्येषां घटकानामतीव महत्त्वं विद्यते । तैरेव जीवनं सुन्दरं संगीतमयं च भवति । चटकादीनि बालानां मित्राणि चिरं जीवन्तु पृथ्वीतले इति धिया मार्चमासस्य विंशतितमः दिनांकः 'चटकादिन'त्वेन उद्धोषितोऽस्ति । निसर्गानुरागिणः बद्धादराः सन्ति संतुलनविषये निसर्गस्य । मानवेन त्याज्यः अविवेकः । ज्ञातव्यं तेनाचिरादेव 'अविवेकः परमापदां पदम्' इति ।**

**अ) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत ।** ०२

१) संसाधनानि प्रयोगेण वर्धन्ते ।

२) स्वार्थपरायणः मानवः निसर्गे अतिक्रमणं न कृतवान् ।

**ब) संस्कृतभाषया एकवाक्येन उत्तरं लिखत ।** ०३

१) चटकादिनं कदा मन्यते ?

२) इदं जगत् कस्मात् कारणात् शोभते ?

३) सर्वेषां सजीवानां कृते कानि संसाधनानि आवश्यकानि ?

## चतुर्थः विभागः – परिशिष्टम्। (०६)

**प्रश्नः ४) उचितं पर्यायं चित्वा पूर्णवाक्येन उत्तरं लिखत ।** ( केवलं ६ ) ०६

१) कपित्थपाकनाम्ना ............... इति काव्यं ज्ञायते ।

अ) किरातार्जुनीयम् ब) नैषधीयचरितम् क) मेघदूतम्

२) बुद्धचरितं ............ विरचितम् ।

अ) कालिदासेन ब) विशाखदत्तेन क) अश्वघोषेन

३) रामायणे ................. श्लोकाः सन्ति ।

अ) २७००० ब) २४००० क) १२००

४) गीतगोविन्दस्य कर्ता कः ................. इति ।

अ) शूद्रकः ब) जयदेवः क) भर्तृहरिः

५) ............... लेखने करुणरसः प्राधान्येन दृश्यते ।

अ) भासस्य ब) कलिदासस्य क) भवभूतेः

६) कृष्णलीलाधारितस्य भासनाटकस्य नामधेयं .................. इति ।

अ) अभिषेकम् ब) बालचरितम् क) अविमारकम्

७) राजनीत्याधारितस्य नाटकस्य नामधेयं .............. इति ।

अ) महावीरचरितम् ब) मृच्छकटिकम् क) मुद्राराक्षसम्

८) ............... इत्यस्य नाटकस्य कर्ता भासः नास्ति ।

अ) मध्यमव्यायोगः ब) कर्णभारः क) मृच्छकटिकम्

**पञ्चमः विभागः - लेखनकौशल्यम्।** **(१५)**

**प्रश्नः ५) यथानिर्देशं कृतीः कुरुत ।**

**अ १) निबन्धलेखनम् - ३ पर्यायेषु १ विषयमधिकृत्य १० वाक्यात्मकं निबन्धं लिखत ।** १०

१. नदी । २. मम प्रियं पुस्तकम् । ३. रक्षाबन्धनम् ।

**अथवा**

**२) कथापूर्तिः -**

**मञ्जूषातः उचितान् शब्दान् चित्वा १० रिक्तस्थानानि पूरयित्वा कथां पुनर्लिखत।** १०

आसीद् कश्चित् राजा सदा सुखी । पुरुषाः, स्त्रियः, बालाः सर्वेऽपि प्रसन्नाः तस्य राज्ये । तत्र सर्वाणि सुखानि ------ आसन् । भवेत् मम राज्ये ------ कूपः इति राजा सङ्कल्पितवान् । अथ तेन ------ कारिता । मम उद्यानस्य समीपे अस्ति ------ । अद्य रात्रौ सर्वे तत्र ------ दुग्धं पातयन्तु । प्रत्येकस्य घटपूर्णेन दुग्धेन राज्ये दुग्धकूपः भवेत् । सर्वैः सा घोषणा श्रुता किन्तु प्रत्येकं चिन्तितवान् ''को नु ------ यदि अहं जलं पातयेयम्, अन्ये तु दुग्धमेव पातयिष्यन्ति । भवतु, अहं ------ नयामि । रात्रौ मां न कोऽपि ---- न च ज्ञास्यति इति मत्वा सर्वैः जनैः कूपे जलमेव पातितम् ।

प्रभाते राजा ------ द्रष्टुं गतः । हन्त किमिदम् नास्ति किञ्चिदपि दुग्धम् । ------ एव पूरितः कूपः ।

( कूपं, जलमेव, दुग्धस्य, सुलभानि, जलेन, द्रक्ष्यति, कूपः, घोषणा, घटपूर्णं, जानीयात् )

**अथवा**

**३) संस्कृतभाषया अनुवादं कुरुत ।** १०

१. ब्रह्मगिरी पर्वतातून गोदावरी नदी उगम पावते.

1.River Godavari originats from the Bramagiri mountain.

| | |
|---|---|
| २. सूर्य पूर्वेला उगवतो. | 2. Sun rises in the east. |
| ३. ते पुस्तक सुन्दर आहे. | 3. That book is very beautiful. |
| ४. झाडे लावून पर्यावरणाचे रक्षण करावे. | 4. Protect environment by planting the trees. |
| ५. मला माहीत नाही. | 5. I don't know. |
| ६. मला दूध द्या. | 6. Give me Milk. |
| ७.तू शाळेत केव्हा जातोस ? | 7. When do you go to school ? |
| ८. पक्षी झाडावर राहतात. | 8. Birds Live on trees . |
| ९. नेहमी खरे बोलावे. | 9. Always speak the truth. |
| १०. संस्कृत-नियतकालिके वाचावित. | 10. Sanskrit-magazines shoud be read. |

**ब) अपठितगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत ।** ०५

**अथवा**

**माध्यमभाषया प्रश्ननिर्माणं कृत्वा उत्तराणि अपि माध्यमभाषया लिखत।** (केवलं ५) ०५

**बुद्धिर्यस्य बलं तस्य । मानवाः हि बुद्धिमन्तः प्राणिनः । कस्यचिदपि कार्यस्य सम्पादने बुद्धिरेव प्रधानभूतं साधनं विद्यते मानवानाम् । बलहीनोऽपि मानवः निजयाऽलौकिकबुद्ध्या मत्तानपि गजान् अतिबलशालिनः अपि सिंहान् च स्ववशं नयति । आधुनिकयुगे यानि नूतनानि आविष्काराणि सन्ति तानि सर्वाणि मनुष्यबुद्ध्यैव निष्पादितानि सन्ति । अद्य मानवः स्वबुद्धिबलेनैव चन्द्रलोकं जिगमिषति । अतः एतन्निर्विवादं सत्यं यत् मानवस्य चक्षुः बुद्धिरेव ।**

## षष्ठः विभागः – व्याकरणम्–उपयोजनकौशल्यम्। (१२)

**प्रश्नः ६) यथानिर्देशं कृतीः कुरुत ।** ( केवलं ४ उपप्रश्नाः लेखनीयाः)

**अ) मञ्जूषातः उचितान् क्रियापदान् चित्वा कोष्ठकं पूरयत ।** ( ८ पर्यायेषु ६ लेखनीयाः) ०३

| द्वितीयभविष्यत्कालः | वर्तमानकालः | आज्ञार्थः | परोक्षभूतकालः | प्रथमभूतकालः | विध्यर्थः |
|---|---|---|---|---|---|
| | | | | | |

( करिष्यति, उपैति, प्रहिणोति, रुद्यात्, उपानयत्, बभूव, मेने, वेद )

**ब) समासाधारितानि रिक्तस्थानानि पूरयत ।** ( ८ पर्यायेषु ६ लेखनीयाः) ०३

| **समस्तपदम्** | **विग्रहः** | **समासनाम** |
|---|---|---|
| राजर्षिः | ..................... | कर्मधारय |
| ................ | लग्ना दृष्टिः यस्याः सा | ................. |
| शक्रसमः | शक्रेण समः | .................. |
| सूत्रधारः | ..................... | .................. |
| ............. | वासाय गृहम् | चतुर्थी तत्पुरुष |
| फलमूलकन्दम् | ...................... | समाहार द्वन्द्व |

**क) उचितं पर्यायं चित्वा रिक्तस्थानानि पूरयत ।** ( ४ पर्यायेषु ३ लेखनीयाः) ०३

१) दुर्भिक्षे राजा बीजभक्तोपग्रहं कृत्वानुग्रहं ................. । ( कुर्वते / कुर्यात् )

२) आपत्सु न मुह्यन्ति ................ पण्डितबुद्धयः । ( नराः / नरः )

३) ............ सह न कदापि स्वैरम् अभाषत । ( आर्येण / आर्यात् )

४) मार्गात् रथं दूरीकृत्य ....... गमनाय मार्गं दत्तवान् । ( तस्य / तस्मै )

**ड) वाक्यपरिवर्तनम् ।** ( ४ पर्यायेषु ३ लेखनीयाः) ०३

१) ......... जनपदं रक्षेत् । ( रिक्तस्थाने तद् सर्वनाम्नः उचितं रूपं प्रयुज्य वाक्यं लिखत ।)

२) गतेषु अस्मासु राजा नः शिरः स्थानानि पश्यतु । ( यदा – तदा प्रयुज्य वाक्यं पुनर्लिखत ।)

३) भवान् न अर्थमवेक्षते । ( 'भवान्' स्थाने 'त्वम्' प्रयुज्य वाक्यं पुनर्लिखत ।)

४) कोसलराजः कोसलं पालयति स्म । ( 'स्म' निष्कास्य वाक्यं पुनर्लिखत ।)

**इ) तद्धितानि /कृदन्तानि परिचाययित्वा अर्थान् माध्यमभाषया लिखत।** (४ विकल्पेषु ३ लेखनीयाः) ०३

१) आतिथेयम् २) निरूढा ३) औपनिषदः ४) विश्रुताः

=====*****==========*****============*****==========*****===========*****=======

महाराष्ट्र राज्य माध्यमिक व
उच्च माध्यमिक शिक्षण मंडळ, पुणे –४११ १०४